ARYAVART SHODH VIKAS PATRIKA
RNI TITLED NO. UPBIL04292
RNI REG. NO. UPBIL/2014/66218
PP. No.- 87-89
ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-17, No.- I, Issues-31, YEAR- Jan.-March-2024

# बौद्धदर्शने प्रमाणविमर्शः

डॉ0 रविशंकर पाण्डेय
असिस्टेण्ट प्रोफेसर– संस्कृत विद्या विभाग, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी (उ0प्र0), भारत

Received-22.01.2024, Revised-29.01.2024, Accepted-04.02.2024 E-mail: drcsrathore.agv@gmail.com

***सारांशः लोके वेदे वस्तुनः यथार्थ बोधाय प्रमाणस्य आवश्यकता भवति। संसारेऽपि वार्तक्रमे जनाः वदन्ति यत् अस्ति किमपि प्रमाणं तर्हि प्रोच्यताम्। भारतीयप्राच्यविद्यायाः प्रवर्तका आचार्याः प्रमाणस्य विशेषमहत्वं प्रदर्शितवन्तः, षडदर्शनेषु न्यायदर्शनस्य अपरनाम प्रमाणशास्त्रमितिशास्त्र विद्भिः समुद्घोष्यते बौद्धदर्शने प्रमाणं समभिलक्ष्य अनेके स्वतंत्र ग्रन्थाः प्रणीताः तेषु प्रमाणवार्तिकम् अन्यतमं वर्तते। अस्य महनीयग्रन्थस्य रचयिता धर्मकीर्तिः महान् बौद्धशास्त्री खलु आसीत् बौद्धदर्शने प्रमाणविषये विशिष्टसंवादं स्थापयति तथा च न्यायबिन्दुः – ग्रन्थस्य प्रणेता विद्यते।***

***कुंजीभूत शब्द– प्रमाणशास्त्रमितिशास्त्र, प्रमाणवार्तिकम्, अनधिगतश्चासौऽर्थः, अनधिगतार्थः, अज्ञातस्य, गत्ता, ज्ञापकम् प्रमाणम्।***

प्रमाणभेदविषये विदुषां मतैक्यंनोपलभ्यते किन्तु प्रमाणविषये मतभिन्नता न लोके, न शास्त्रे, न वेदे, न च दर्शने समुपलभ्यते। किं नाम प्रमाणम् इति प्रश्ने पूर्वं प्रमाणशब्दस्य व्युत्पत्तिः क्रियते, प्रमीयते अनेन् इति प्रमाणम्, प्रपूर्वक माङ्–माने धातोः ल्युटि प्रमाणम् इति निष्पद्यते, अत्र अंशत्रयम् विद्यते प्र इति, द्वितीयोऽशः माङ् माने धातोः, तृतीयोऽशः ल्युट् इति प्रत्ययः करणार्थे विद्यते, एतत् सर्वं समीक्ष्य तर्कभाषाकारः प्रमाकरणम् प्रमाणम् इति वदति।

प्रमा इति यथार्थज्ञानम् समवायि–असमवायि–निमित्तकारणानाम् मध्ये यत् केनाऽपिप्रकरेण असाधारणम् प्रकृष्टं वा भवति तत् कारणम् प्रोच्यते, एवं न्याय दर्शने प्रमाकरणं प्रमाणम् इति प्रमाणस्य दोषरहितं लक्षणम् सर्वैः नैयायिकैः स्वीक्रियते।

बौद्धदर्शनवेत्तारः मीमांसकाश्च अनधिगतार्थ गन्तृं प्रमाणम् इति लक्षणम् निर्धारयन्ति, अनधिगतार्थ अर्थात्, अनधिगतश्चासौऽर्थः अनधिगतार्थः अनधिगत इत्यस्य तात्पर्यम् न अधिगतम यस्य ज्ञानम्, न जातम् अर्थात् अज्ञातस्य अर्थः अनधिगतार्थ इति प्रोच्यते। तस्य अनधिगतार्थस्य गत्ता, बोधकम् अनधिगतार्थ गन्तृप्रोच्यते सारांश रुपेण अज्ञातस्य ज्ञापकम् प्रमाणम् भवति। भारतीयप्राच्यविद्यायां सन्ति खलु अनेकानि दर्शनानि तेषु दर्शनेषु बुद्धप्रणीतस्य दर्शनस्य सिद्धान्ताः अधुनाऽपि उपयोगिनः विद्यन्ते। अन्य दर्शनमिव बौद्धदर्शनमपि स्वसिद्धान्ते प्रमाचिन्तनम् प्रमाणविमर्शः इन्द्रियविवेचनम् सृष्टिरहस्यम् प्रकृति तत्वम् सत्यान्वेषणम् प्रभृतीन् विषयान् सतर्कं चिन्तयति। अस्य खलु निबन्धस्य मुख्यः विषयः प्रमाणविमर्श इति प्रमाण सन्दर्भे–

अनेके स्वतन्त्र ग्रन्थाः, विविधग्रन्थेषु स्वतन्त्रप्रकरणं च प्रमाणस्य महत्वं प्रदर्शयन्ति नैयायिकाः प्रत्यक्षानुमानोषमानशब्दा चत्वारि प्रमाणानि सिद्धान्तयन्ति तत्र बौद्धवेत्तारः प्रत्यक्षानुभावे प्रमाणद्वे अङ्गी कुर्वन्ति। शब्दोपमानप्रमाणयोः प्रत्यक्षानुमानप्रमाणे अन्तभार्वकृत्वा स्व–सिद्धान्तम् प्रदर्शयन्ति।

इत्थं बौद्धदर्शने प्रत्यक्षप्रमाणम् अनुमानप्रमाणञ्च, प्रमाणद्वयम् स्वीक्रियते, वस्तुतः प्रमाणेषु मौलीभूतम् प्रत्यक्षं प्रोच्यते तस्मात् अस्य प्रमारणस्य सर्वप्रथमं गणना क्रियते, प्रत्यक्ष शब्दस्य व्युपत्तिः अक्षि–अक्षिप्रति इति प्रत्यक्षम्। अत्र वीप्सायाम् अव्ययीभावसमासः 'अर्शादिभ्यो' इत्यनेन अचि प्रत्यये प्रत्यक्षशब्दः सिद्धयत्ति।

न्यायभाष्यकारः वात्स्यायनऋषयः किञ्चित् अपूर्वं प्रत्यक्षविषये मतंस्थापयत्तः प्रस्तुवन्तियत् = प्रतिगतम् अक्षम् अर्थात अक्षस्य – अक्षस्य प्रतिविषयम् वृत्तिः प्रत्यक्षम् इति परिभाषितवन्तः, अनेन इन्द्रियाणाम् स्वविषयेषु उपस्थितिः व्यापारो वा प्रत्यक्षत्वेन प्रोच्यते एवं नेत्रम्, श्रोत्रम्, घ्राणम्, रसना, त्वक्, मनः इन्द्रियादीनि इन्द्रियाणि प्रत्यक्षप्रमाणस्य साधकानि इति मत्वा इन्द्रियार्थसन्निकर्षजन्यं ज्ञानम् साक्षात्कारिप्रमाकरणम् इति प्रत्यक्षम् विवदन्ति इति नैयायिकाः। साक्षात्कारिप्रमा तस्याः करणम् साक्षात्कारि प्रमाकरणम् इति निगद्यते साक्षात्कारयत्ति अर्थात् इन्द्रियार्थयोः सन्निकर्षेण उत्पादयति ज्ञानं इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं आहोस्वित्– साक्षात्कारिप्रमाकरणम् लक्षण द्वये विषयभेदो नास्ति।

बौद्धाः प्रत्यक्षप्रमाणस्य लक्षणविषये किञ्चित् भिन्नं मतम् स्थापयन्ति तेषां बौद्धानां विशेषतः धर्मकीर्तिनये अज्ञातार्थप्रकाशकंज्ञानम् प्रत्यक्षम् प्रोच्यते भगवतः प्रत्यक्षं न भवति तस्मात् बौद्धाः ईश्वरं न प्रमाणयन्ति धर्मकीर्त्तिः प्रमाणवार्तिकनामके ग्रन्थे प्रमाण सिद्धः नामकमेकं प्रकरणम् अलिखत्। तत्र प्रमाणलक्षणविषये सविस्तरणं महनीयाचर्चा अपिकृता प्रमाणलक्षणं इति अंशम् शीर्षकम् विधाय कारिकेयं निगदिता।

**अविसंवादिज्ञानम् प्रमाणम् प्रमाणमविसंवादिज्ञानम्।**
**अपि संवादनशब्द निरुक्तिः अर्थक्रियास्थितिः।**
**अविसंवादनं शाब्देज्ञानेऽपि प्रामाण्यं शब्देऽप्यभिप्रायनिवेदनात्।।**
**प्रस्तुतकारिकया ज्ञानं प्रमाणम् इति सारांशनिष्पत्तिर्जायते।**

अर्थात् अज्ञानम् प्रमाणम् भवितुं नार्हति भित्र प्रश्नः कीदृशं ज्ञानम्, प्रमाणम् तत्र विशेषणम् प्रदीयते अविसंवादि ज्ञानः प्रमाणम् किं नाम अविसंवादि– इति विमर्शे न संवादि इति अविसंवादिः इति अवति तत्र विसंवादनम् अर्थात् वंचनम् योगात् विसंवादि भवति, विसंवादेरभावः अविसंवादनमप्रोच्यते, यस्य मौली भूतोऽर्थः उक्तमित्यर्थः अर्थात् उक्तम्ज्ञानम् (कथितज्ञानमं) प्रमाणत्वेनाभिधीयते।

बौद्धमतसमालोचनया खलु प्रमाणम् अविसंवादि ज्ञानम्, तस्य अविसंवादिज्ञानस्य उपपत्तिः शब्द, निरुक्तिः द्वारा सञ्जायते। शब्द व्यवहारोऽपि अर्थम् उद्देश्य अहोस्वित क्रियां अभिलक्ष्य सञ्जायते। समुदितरूपेण अर्थविषयकम् क्रियाविषयकम् यद् कथनम् अति–संवादनम् वा शब्दनिरुक्ति द्वारा भवति तस्मात् अवि संवादनम् प्रमाणम् इति धर्मरक्षितः सिद्धान्तयति। शब्दप्रमाणेऽपि अभिप्रायनिवेदनम् भवति अभिप्रायनिवेदनत्वात्, अविसंवादनम् स्पष्टतया प्रतीयते। तस्मात् शाब्देज्ञाने प्रामाणम् धर्मकीर्तिः स्वकारिकायां प्रोवाच शब्द द्वारा रूप, रस,

ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-17, No.- I, Issues-31, YEAR- Jan.-March-2024

गन्ध, स्पर्शादीनाम् ज्ञानम् भवितुं नार्हति अर्थात् दर्शनेन प्रमार्थ क्रियाज्ञानम् नास्ति इति तत्र इन्द्रियार्थ सन्निकर्ष द्वारैव गन्धस्पर्शादीनां बोधोपजायते अत्र अविसंवादनमित्यस्यतात्पर्यम् इन्द्रियादिभिः परिक्षणम् कृत्वा गन्धादीनां अनुभव इति अवगम्यते।

प्रमाणवार्तिके नामके ग्रन्थे धर्मकीर्तिः प्रमाणस्य अपरं लक्षणं प्रस्तौति सा च कारिका अत्र प्रदीयते– अज्ञातार्थप्रकाशो वा, सामान्यज्ञानेऽप्रामाण्यम् स्वरुपाधिगतेः परम्।।

धर्मकीर्तिः अस्यां कारिकायामपि ज्ञानं प्रमाणं वदति अत्र कीदृशं ज्ञान इति जिज्ञासायां अज्ञातार्थप्रकाशकं इति इतः पूर्वमपि ज्ञानमेव प्रमाणम् किन्तु ज्ञाने अविसंवादिविशेषणम् आसीत्।

प्रमाणम् वस्तुतः दार्शनिकविषयः अस्ति अतएव सर्वे दार्शनिकाः प्रमाणविषये स्व–स्वमतं स्वस्वदर्शन शरण्याजिगादीषु सांख्यदर्शने व्योरेक तरस्य बाध्य सन्निकृष्टार्थ परिच्छित्तिः प्रभा तत् साधकतम् यत् तत् त्रिविधं प्रमाणम्।

एतदेव योगदर्शनेऽपि स्वीक्रियते सांख्ययोगदर्शनयोः प्रमाणम् अचेतनम् किन्तु प्रमायाः साधतमम् विद्यते मीमांसकेषु प्रमाण विषये आचार्यद्वौ उल्लेखनीयौस्तः कुमारिलभट्ट प्रभाकरौ इति, कुमारिभट्ट प्रोवाच यत् भिन्नाधिगततथाभूतार्थ निश्चायकम् प्रमाणम् अत्र सूक्ष्मरूपेण विचार्यतेचेत् तदा वास्तविकार्थः निश्चायकं प्रमाणं भवति न्याय दर्शनमपि प्रभाकरणम् प्रमाणं इत्युक्त्वा कुमारिलभट्टस्य निर्णयं, सम्पोषयति मीमांसा दर्शनस्य अपरः महान् दार्शनिकः किञ्चित् भिन्नम् मतम् प्रस्तौति– अताथात्वात् प्रकाशको ज्ञातृव्यापारो अज्ञानरुपोऽपि प्रमाणम् अथवा अनुभूतिः प्रमाणम् लक्षणेस्मिन् अंशत्रयम् ज्ञातस्य अज्ञानरुपम् प्रमाणम्, ज्ञातृ व्यापार प्रमाणम्, अनुभूति प्रमाणम् इति विवेचनीयम् मीमांसा दर्शने विद्यते।

जैनाचार्य प्रभाकरमतेन सह सामञ्जस्यम् स्थापयन्तः स्वपूवार्थव्यवसायात्मकं ज्ञानम् प्रमाणम् इति प्रणिगदन्ति जैनदर्शनेऽपि अपूर्वार्थं निश्चायकम् ज्ञानम् प्रमाणत्वेनाऽभिधीयते। बौद्धदर्शने प्रमाणवार्तिकमतमनुसृत्य प्रमाणस्य लक्षणम्, अस्मिन्नेव निबन्धे विचारितम् प्रधानत्वेन किन्तु अस्यैव दर्शनस्य न्यायबिन्दुः एकः महान ग्रन्थः, तस्मिन खलु महनीये ग्रन्थे अविसंवादकं ज्ञानम् सम्यक ज्ञानम्– एव प्रमाणम् सहैव अनधिगतविषयं प्रमाणम् अपि न्यायबिन्दुकारः लिखति।

न्यायविन्दुकारः स्पष्टयति कल्पनारहितं निर्भ्रान्तं ज्ञानम् प्रत्यक्षप्रमाणम् भवति एवं कृत्वा न्यायविन्दुकारः इन्द्रियप्रत्यक्षं मनः प्रत्यक्षम्, स्वसंवेदनप्रत्यक्षम्, योगिप्रत्यक्षम् चत्वारः भेदान् प्रत्यक्षस्य दर्शिवान् वस्तुतः प्रत्यक्षप्रमाणस्य फलम् न्याय बिन्दुनामके ग्रन्थे आचार्य प्रवराः धर्मकीर्तिचरणाः प्रत्यक्षप्रमाणस्य अहोस्वित् अनुमानप्रमाणस्य लक्षणचिन्तनं कृत्वा भेदान् निरुपितवन्तः अनुमानस्याऽपि भेदद्वयं– स्वार्थानुमानं परार्थानुमानञ्च तत्र अनुमानं द्विधा द्विप्रकारकम् परार्थानुमानं शब्दात्मकं स्वार्थानुमानं तु ज्ञानात्मकम् धर्मकीर्तिः अनुमानभेद निरूपणे शङ्कामुद्भावयति यत् पूर्वं अनुमानस्य लक्षणसम्पादनीयम् पुनश्च भेदोपपादनीयाः। नावश्यकीरिरीतिरियं यतोहि तयोः स्वार्थपराथानुमानयोः प्रतिनिधलक्षणमाख्यातुं प्रकारभेदः कथ्यते।

**प्रकार भेदो व्यक्ति भेदः। व्यक्तिभेदे च कथिते प्रतिव्यक्ति नियललक्षणं शक्यते वक्तुं।**

बौद्धदर्शने स्वार्थपरार्थशब्दयोः उत्तमाव्याख्या समुपलभ्यते स्वस्मात् इदं स्वार्थं, येन स्वयं प्रतिपद्यते तत् स्वार्थम् परस्मात् इदं स्वार्थं, येन परं प्रतिपादयति परार्थम्। बौद्धाः नैयायिकाश्च प्रमाणस्य भेदाः प्रत्यक्षं अनुमानञ्च मतभेदञ्च न प्रदर्शयन्ति किन्तु प्रत्यक्षप्रमाणस्य भेदे वैमत्यं प्रदर्श्यते नैयायिकमते वस्तुदृष्ट्वा वस्तुनः ज्ञानम् निर्विकल्पकत्वेन सविकल्पकत्वेन चक्रियते एवं रीत्या सविकल्पकम् निविकल्पकम् प्रत्यक्षस्य भेदद्वयं तत्र बौद्धाः निर्विकल्पक प्रत्यक्षम् तु स्वीकुर्वन्ति सविकल्पकप्रत्यक्षम् खण्डयन्ति अनुमानेऽपि न्याय–बौद्ध दर्शनयोः भेद निरुपणे विशेष वैमत्यम् नैवपरिलक्ष्यते न्यायमतरीत्या अनुमानस्य भेदद्वयं स्वार्थानुमानम् परार्थानुमाञ्च सहैव लिङ्गापरामर्शे अनुमानम् इति अनुमानस्य लक्षणम् न्यायशास्त्रैः निर्धारितम् अस्ति। तथा च भेदस्य लक्षण द्वारा अनुमानस्य लक्षणम् निर्धारयति बौद्धः न्यायबिन्दुनामके ग्रन्थे स्वार्थानुमान निरुपणावसरे तत्र स्वार्थं निरुपाधिकमनुमेयेज्ञानम् तदनुमानम् साररुपेण स्वार्थ परार्थानुमानयो मध्ये यच्च स्वार्थज्ञानम् विद्यते तच्च विशेषणविशिष्टं अस्ति अर्थात् निरुपात् विशिष्टं स्वार्थं पदज्ञानम् अनुमेये प्रतीयते तदेव अनुमानपदेनोच्यते अत्र लिङ्गपदेन किं गृह्यते तथा च अस्य लिङ्गस्य कानि भेदरुपाणि इति विचारणीयपक्षः अनुमाने स्पष्टयति।

लिङ्गशब्दस्य नानाटीकासु व्युत्पत्तिपरकः अर्थ लिङ्गयते गम्यते अर्थः अनेन इति लिङ्गम् अर्थात् चिन्हम् इति ये चिन्हेन तस्य चित् वस्तुना ज्ञानम् भवति तदिचन्हम् तस्य वस्तुनः लिङ्गः प्रोच्यते तच्च लिङ्ग त्रिविधात्मकम्, त्रिविधात्मकात् लिङ्गात् जातम् यद्ज्ञानम् तद् खलु स्वार्थानुमानम् अस्ति। तत्र त्रीणि रूपाणि बोधयितुं त्रीणिवाक्यानि न्यायबिन्दुनामके ग्रन्थे धर्मकीर्तिना प्रथितानि– लिङ्गस्यानुमेये सत्वमेव, द्वितीयसपक्ष एव सत्वम्, तृतीयम् असपक्षे चासत्वमेव निश्चितम्। एतदेव सांख्य दर्शनेऽपि त्रिविधलिङ्गस्य परिकल्पनाकृता।

**प्रतिविषयाध्यवसायोदृष्टं त्रिविधमनुमानमाख्यातम्।**
**तल्लिङ्ग लिङ्की पूर्वकमाप्तश्रुतिराप्तवचनं तु।।**

धर्मकीर्तिः स्वप्रणीते प्रमाणवार्तिकग्रन्थे प्रथमे परिच्छेदे प्रमाणस्य सामान्यम् किं लक्षणम् सतर्कं विमृष्टवान्, द्वितीये परिच्छेदे मानम् अर्थात् प्रमाणम् तस्य विषयभेदत्वात् भेदद्वयञ्चकार प्रत्यक्षानुमाने विषयस्य द्वयीविद्यात् इत्यस्य तात्पर्यं समुद्घाटयता प्रमावार्तिक टीकाकारेण विषयस्य स्वलक्षणसामान्यलक्षणरुपतया द्वयी विद्यात् इति अकारण।

शाब्दादिकमपि प्रमाणम् सविषयं वक्तव्यमेव विशेषश्च स्वसामान्य–कदापि अतिरिक्तो न भवति एतद् विषये प्रत्यक्षानुमान प्रमाणद्वयम् भवति अस्मिन्नेव सन्दर्भे इयं कारिका प्रसिद्धा–

**मानं द्विविधं विषयद्वैविध्यात् शक्त्यरित्तः।।**

नैयायिकाः प्रमाणवार्तिककारस्य अनुमानस्य भेदद्वयं स्वीकुर्वन्ति किन्तु सवार्थानुमान परार्थानुमानयोः प्रदत्तलक्षणं! न स्वीकुवन्ति तत्र बौद्धा अनुमानज्ञाने व्याप्तिग्रहणम् तु स्वीकुर्वन्ति किन्तु साध्यस्य सन्देहः अर्थ क्रियाकारितया नानुमोदन्ति नैयायिकाः अनुमानस्य प्रक्रियां चत्वारि आवश्यकानि अङ्गानि प्रथमव्याप्तिग्रहणम्, द्वितीयंसाध्यस्य सन्देहः तृतीय व्याप्तिस्मरणम् चतुर्थं हेतोः पक्षे स्थितिश्च एवं कृत्वा

ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-17, No.- I, Issues-31, YEAR- Jan.-March-2024

समन्वयम् अपि कुर्वन्ति पर्वतो वह्निमान् धूमात् इत्यत्र साध्यं वह्निमत्वं तस्य संशयः पर्वते अस्ति तस्मात् पर्वतः पक्षः पद्यम्यत पद घटितं धूमात् इत्यत्र धूम इति हेतुः यत्र यत्र धूमः तत्र तत्र वह्निः इति व्याप्ति प्रसङ्गेऽस्मिन्।

महानसादौ व्याप्तिं दृष्ट्वा पर्वते अविच्छिन्नधूमरेखां अवलोक्य पर्वते अग्नि अस्ति इति स्वमेव प्रतिपद्यते एतदेव स्वार्थानुमानं नैयायिकानां मतम् अन्यः कश्चित् प्रस्तुत एव प्रसङ्गे स्वयं धूमात् अग्निमनुमाय अपरं जनं बोधयितुं पञ्चावयवानुमानवाक्यं प्रयुङ्क्ते तत् खलु परार्थाः नुमानपदेन निगद्यते अनुमानवाक्यमयथा पर्वतोऽवह्निमान्, धूमत्वात्, योयोधूमवान् ससोऽग्निमान, यथा महानसः, तथाचाऽयं, तस्मात् तथा इति प्रस्तुता प्रतिज्ञा वाक्यद्वारा परस्मै अग्निः प्रतिपद्यते, अर्थात् पर पुरुषोऽपि अग्निं जानाति प्रक्रियेऽयं परार्थानुमानपदेनावगम्यते। इत्थं अनुमानस्य स्वरूपं तस्य भेदनिरूपणम् भेदयोः लक्षणम् उदाहरणञ्च च उदाहरणगत भेद निरूपणम् सतर्केण प्रमाणज्ञै नैयायिकै अभाणि बौद्धाः परार्थानुमाने अनुमेयपदार्थस्य बोधाय पञ्चावयववाक्यरूपसरणिं न स्वीकृत्य अनुमेयः खलु जिज्ञासित विशेषः सरणिं वदन्ति नैयायिका मते साध्यप्रतिपत्तिकाले समुदायः अनुमेयः भवति। किन्तु बौद्धाः व्याप्ति निश्चयकाले तु धर्मो अनुमेयः इति दर्शयन्ति धर्मः यदि अनुमेयो भवति तत्र स्वाभाविकरुपेण प्रश्नः उदेति कस्य धर्मः तर्हि साध्यस्य धर्मः एतदेव मनसि निधाय धर्मकीर्तिः प्रमाणवर्तिके साध्यधर्म सामान्येन सामनो धर्मः सपक्षः इति भवति।

भारतीयदर्शनेषु प्रमाणस्य माहात्म्यम् यथार्थबोधाय विद्यते उच्यते वेदानत दर्शने ज्ञानान्मुक्तिः तथैव ज्ञानन्निर्वाणमपि वक्तुं शक्यते न्यायदर्शनेऽपि पदार्थ ज्ञानात् निःश्रेयसावप्तिः इति प्रस्तुतःचिन्तनेन ज्ञानस्य महनीयम् महत्वमवगम्यते तत्र ज्ञानम् द्विविधं प्रमात्मकं भ्रमात्मकञ्च प्रमात्मक ज्ञानेन मुक्ति कल्पना अर्थशून्या प्रमात्मकेन ज्ञानेन मुक्तिः कल्पना सार्थकभूता।

तत्रापि ज्ञानं प्रमात्मकं तदर्थं प्रमाणविमर्शे बौद्धानामपियात्रा वाक्यार्थविषयः पण्डितानाङ्कृते विद्यते बौद्धदार्शनिकेषु दिङ्गनाग, ध र्मकीर्तिः, धर्मरक्षितः प्रभृतयः विद्वांसः प्रमाणविषयम् स्वतन्त्र रूपेणलिखितवन्तः शास्त्रार्थप्रसङ्गे नैयायिकाः वैयाकरणाः' अपि।

मीमांसकाः वेदन्तिनश्च बौद्धमतसमर्थितप्रमाणविषये खण्डनमण्डनप्रक्रियां अतन्वन किंतु बौद्धमतं अपि व्यवहारिकं ग्राह्यय् इति चिन्तनेकेषां सीदपि वैमत्यन्नस्ति तात्पर्य टीकायां वाचस्पति मिश्रः प्रत्यक्षस्य चत्वारो भेदाः इति बौद्धइव समर्थयन्ति तत्र कुमारिलभट्टोऽपि प्रत्यक्ष लक्षणम् बौद्धानांखण्डयन्ति किन्तु प्रत्यक्षस्य बौद्ध इव भेदान् स्वीकरोति प्रत्यक्ष प्रमाणतिरिक्तम् अनुमानप्रमाणमङ्गीकरणीयम् तत्र हेतुः प्रदीयते इन्द्रियार्थ सन्ति कर्ष न भावेऽपि यद्ज्ञानम् भवति तत्तु– अनुमानमिति कृत्वा सर्वैः स्वीक्रीयते वाक्यपदीयकारः भर्तृहरयः अतीतानागतज्ञानम् प्रत्यक्षात् विशिष्यते तदर्थं अनुमानप्रमाणम् इति तात्पर्यं बौद्ध दर्शने विशेषन्याय बिन्दु नामके ग्रन्थे परिलक्ष्यते। अनुमान प्रमाणस्याऽपि मीमांसायाम् नैयायिकानां बौद्धमतस्वीकारे वैमत्यं दरीदृशते तत्राऽपि अनुमानस्य भेदद्वयं बौद्धाः नैयायिकाः अपि स्वीकुर्वन्ति परार्थानुमाने पञ्चावयव– वाक्यस्यावश्यकता भवति। किन्तु बौद्धमते त्रिसंख्यात्मकावयवानाम् अनुमानबोधाय आचार्येण दिङ्गनागेन प्रतिपादितम्। पर्वतो वह्निमान् धूमात् इति उदाहरणे हेतुविषये बौद्धानाम चिन्तनम् व्यवहारिकम् दृश्यते। बौद्धा वदन्ति पर्वतोऽयं वह्निमान् इति ज्ञानाय पर्वते धूमस्य स्थितिः आवश्यकी एवमेव सपक्षे महानसे अतीतकाले धूमप्रत्यक्षम् आवश्यकम पुनश्च विपक्षे जलाशये धूमाभावः आवश्यकः एवमहेतौ त्रीणितत्वानि बौद्धदार्शनिकै सतर्कं स्थापितानि बौद्ध दर्शने अग्निधूम सम्बधोऽपि अनुमानप्रमाण व्याख्याप्रसङ्गे विचारितोऽस्ति तत्र अग्निः अनुमीयते धूमहेतुना किन्तु सच धूमः अग्रेः उत्पन्नोऽस्ति उत्पन्नत्वात् धूमः कार्यमस्ति, कार्यम्भूत्वाऽपि हेतुत्वने सर्वैः दार्शनिकैः स्वीक्रियते अत्र केषाचित वैमत्यन्नस्ति।

अनुमानमिव पृथक् रुपेणानुमानाभासः वेदान्तदर्शन इव बहुषु स्थलेषु बौद्धाः अङ्गीकुर्वन्ति बहुषु स्थलेषु अन्यदार्शनिकइव वैमत्यम् प्रदर्शयन्ति अनुमानस्य त्रीणि अङ्गानि पक्षहेतो दृष्टानितानि इति तत्र भ्रान्त्या पक्षाभासः हेत्वाभासः, दृष्टान्ताभासश्च जायते एवं त्रिविधं अनुमानम् सांख्यदर्शन इव बौद्ध दर्शनेऽपि चिन्तितम् विद्यते।

निबन्धेऽस्मिन् प्रमाणस्वरुपम्, प्रमाणभेदम्, चिन्तयित्वा प्रमाणस्य व्यवहारिकविवेचनम् दृष्टान्तद्वारा बौद्धमतालोके यथाबुद्धिः स्थापितं विद्यते।

## संदर्भ ग्रन्थ सूची

1. तर्कभाषा पृ0 39.
2. पाणिनीयसूत्र
3. प्रमाणसिद्धि– पृ0सं0–3
4. प्रमाणवार्तिक– पृ0सं0–6
5. सांख्य सू0 प्र0अ0
6. श्लोक वर्तिक
7. न्याय बिन्दु–द्वि0परि0
8. न्याय बिन्दु–द्वि0परि0
9. न्याय बिन्दु–द्वि0परि0
10. सांख्य कारिका0 का0सं0 5
11. प्रमाणवार्तिक द्वि0 परि0
12. प्रमाणवर्तिक व प्रत्य0परि0

*****